Sri Kantha Sivacharya

Vyas sutriya brahma mimansa bhashya - Chaple-1 4th Part

व्यास सूत्रीय ब्रह्ममीमांसा शैवभाष्यम् - प्रथम - अध्याय - चतुर्थ पाद

Sanskrit

Paper - Handwritten

1946 Sambat (129 years old)

15 Folio

11.8" x 6"

Complete

श्रीकंठीय
शैवभाष्यं
१

श्रीमन्महागणपतयेनमः ॐ श्रीमत्सद्गुरुशंकरेंद्रचरणद्वंद्वस्मरणात्प्रसादाच्छ्रीमद्विश्वपतिर्वरद
ऽद्विगणपंध्यात्वान्नपूर्णापरां श्रीमद्व्यासनिरूपितागममहासूत्रीयभाष्योत्तमं श्रीकंठीयम
हं लिखाम्यतितरामल्पोप्यहेमस्मृतिः १ अथब्रह्ममीमांसाभाष्ये प्रथमाध्यायस्य चतुर्थपादा
रंभः ॐ पूर्वपादेष्वस्पष्टास्पष्टब्रह्मलिंगानि वाक्यानि विचारितानि। चतुर्थेऽस्मिन्पादेऽस्पष्टलिं
गानि कानिचिद्वाक्यानि विचार्यंते॥ ॥आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्य
स्तगृहीतेर्दर्शयति च १॥ ॥एकेषां कठानां शाखायामाम्नायतेऽस्य विषयः। इंद्रियेभ्यः
परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ महतः परमव्यक्तम १
व्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः॥ ॥इत्यादिकः। अत्र महतः
परत्वेनाव्यक्तशब्दवाच्यं प्रधानं कापिलमुत शरीरं वेति संशयः। प्रधानमिति युक्तिः पूर्वपक्षी

याः कथं। महदव्यक्तपुरुषाणां सांख्यतंत्र एव प्रसिद्धेः। तेषामिह श्रुतौ प्रत्यभिज्ञा भवति। वपु
षोनकस्त्विदिहप्रसंगः। तस्मात् सांख्यं प्रधानमिति। वपुरिति सिद्धांतो ऽयुक्तः। पूर्वत्र आत्मा
नं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥ इंद्रियाणि हयानाहुर्वि
षयांस्तेषु गोचरान्॥ ।इत्यात्मशरीरादिरूपासनोपायेषु वशीकार्यत्वाय रथिरथादिरूप
कविन्यस्तेषु परिशिष्टस्य शरीरस्य रूपकस्य विन्यस्तस्याव्यक्तशब्देन ग्रहणात्। इंद्रियेभ्यः पर
त्वर्थाः इत्यारभ्य सा काष्ठा सा परा गतिः॥ इत्यंतेन वशीकार्यत्वाय प्रत्युत्तरोत्तरं परत्वं तेः
यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि यच्छेत्तद्यच्छेच्छांत आत्मनि॥
॥ इत्यादिना श्रुतिरेवोत्तरत्र च दर्शयति। ततो ऽव्यक्तं वपुरत्र प्रतिपाद्यं॥१॥ ॥ननु प्रधानमे
वाव्यक्तमिति प्रसिद्धं। कथमिह शरीरमित्याशंकायामाह॥ ॥सूक्ष्मं तु तदर्हत्वात् २ सूक्ष्म

श्रीकंठीय मित्यव्यक्तमुच्यते। अव्यक्तमेव शरीरं वस्त्वं कार्यात्मनयाव्यक्तशब्दवाच्यमितियुक्तं॥२॥ ॥
शैवभा॰ युक्तंतरमुच्यते॥ ॥तदधीनत्वादर्थवत् २ आत्मशरीरादिकं परमेश्वराधीनतयार्थे
२ वदुपासनानिर्वृत्तये भवति। परमेश्वरोऽन्तर्यामी सर्वमात्मादिकं प्रेरयन्नेव चेतोपासनोपायत्वे
न वशीकार्यकाष्ठाप्राप्तत्वेन॰॰ साकाष्ठासापरागतिः॰॰ इत्युच्यते। ततोऽव्यक्तमिह शरीर
मेव॥३॥ ॥ज्ञेयत्वावचनाच्च ४॥ ॥यदिसांख्यप्रधानमत्राव्यक्तं॰ तदास्य ज्ञेयत्वमुच्येत।
न च तदस्ति। ततो न कापिलमव्यक्तं॥४॥ ॥ज्ञेयत्वमप्यस्यास्तीत्याशंक्य परिहरति॥ ॥ २
वदतीति चेन्न प्राज्ञो हि प्रकरणात्॥५॥ ॥अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमग
न्धवच्च यत्। अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते॥ इत्यस्यामपि नि
चाय्यतां वदतीति चेन्न युक्तेः॰॰ यच्छेद्वाङ्मनसी प्राज्ञ॥ इति प्राज्ञस्यैव पूर्वं प्रकृतत्वात्॥५॥

॥ततोऽप्यनेकं शरीरमेव। प्रधानस्य प्रसंग एव नास्तीत्याह॥ ॥त्रयाणामेव चैवमुपन्यासः
प्रश्नश्च॥६॥ त्रयाणामुपास्योपासनोपासकानामेवात्र प्रकरणे ज्ञेयतया प्रश्न उपन्यासश्च क्रि
यते। न प्रधानादेः। यथा। तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगा-
धिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥ ॥इत्यादिरुपन्यासः॥ येयं प्रेते विचिकित्सा
मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इ-
ति॥ अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत् तत्प
श्यसि तद्वद॥ इति प्रश्नः। तस्मादप्रकृतत्वादपि शरीरमेवाव्यक्तं न प्रधानं॥६॥ ॥किंच। लिं
गांतरमप्यस्तीत्याह॥ महद्वच्च॥७॥ ॥यथेह। बुद्धेरात्मा महान्परः॥ इत्यत्र न तांत्रिको महा
न्भवति। आत्मशब्दादपि न प्रधानमिति निर्णयः॥७॥ ॥अप्रकृतत्वादिह न प्रधानप्रसक्तिः

श्रीकंठीय वद्गतिर्भवतु। अन्यत्र प्रधानमेव कारणत्वेन श्रूयत इत्याशंकाधिकरणमिदमारभ्यते॥ ॥चम
शैवभाष्यं सवदविशेषात्॥ श्वेताश्वतरोपनिषदि श्रूयते स्म विषयः॥ अजामेकां लोहितशुक्लकृष्णां
२ बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः
॥ ॥इति। इह सर्वप्रपंचकारणत्वेन जन्मरहितत्वादजेति श्रूयमाणा प्रकृतिः सांख्यसिद्धा परा
वेति संशये सांख्यसिद्धेति वक्तुं युक्तं॥ अजां॥ इति जन्माभाववचनात्॥ सर्वप्रजाकारणत्वा
च॥ लोहितशुक्लकृष्णां॥ इति वर्णोपलक्षितगुणत्रयावगमाच्च॥ तदन्यस्याः कस्याश्चिदे
वंविधत्वं न युक्तमिति प्राप्ते सिद्धान्त उच्यते। न तंत्रसिद्धा प्रकृतिरिह कारणत्वेनोच्यते। नहि जन्मा २
भावमात्रेण तस्या एव प्रतीतिः। अर्वाग्बिलश्चमस इतिवत्प्रकरणविशेषाभावात्। यथा इदं
तच्छिर इति चमसो विशेष्यते। यौगिकशब्दादिह शेषप्रतीतिर्हि विशेषकापेक्षा। ततोऽनंतां त्रिको

प्रकृतिरिति॥८॥ ॥तंत्रसिद्धायाः प्रकृतेरस्याकोदृशीत्यतस्याह॥ ॥ज्योतिरुपक्रमात
तु तथाह्यधीयत एके ९ ज्योतिरिति परमेश्वर उच्यते। परमेश्वरकारणिकोयमजा प्रकृति
रित्युच्यते। तथा परमेश्वरकारणिकाया एव प्रतिपादनमेके तैत्तिरीयकास्तत्स्वरूपमधीयते हि
अणोरणीयान् महतो महीयान्॥ इत्यारभ्य परमेश्वरमुपक्रम्य ३॥ सप्तप्राणाः प्रभवन्ति त
स्मात्॥ इत्यादिना प्राणादिप्रपञ्चकस्य २ परमेश्वरादुत्पत्तितदात्मकत्वप्रतिपादनसमये सजा
मितिपठंति। अतस्तत्त्वस्याभिज्ञानादिप्रमजापि परमेश्वरकारणिका सर्वथेति निश्चीयते। अ
तो न तंत्रसिद्धेतिवादोऽयुक्तः ३॥९॥ ॥ननु परमेश्वरकारणिकेत्यस्याः परमेश्वरकार्यत्व
मुच्यते। कथमस्यास्तादृश्या अजामितिरूपवाद इत्याशंक्याह॥ ॥कल्पनोपदेशाच्च मध्वा
दिवदविरोधः १० कल्पनेति सृष्टिरुच्यते। ८ छंदांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदाव

कल्पनोपदेशाच्चमध्वादिवदविरोधः १०॥ ॥

तिश्चास्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः॥ मायां तु प्रकृतिं विद्यान्मा
यिनं तु महेश्वरं॥ ॥इति सत्युपदेशादजात्वमहेश्वरकार्यत्वयोरविरोधः तथाहि प्रलयका
लेनामरूपे विहायाचिदचिद्रूपा मायापि सूक्ष्मरूपेण महेश्वरस्य शरीरतया तिष्ठतीत्यजा। सृष्टि
समये नामरूपोपेतानन्तकारणिकेति यथा॰ आदित्यस्य वृष्टिसमये वस्त्रादिभोग्यसाधारत्वेन प
थुत्वं कार्यत्वं च। तस्यैव पुनः प्रलयकाले मध्याह्नेऽप्रदेशान हीमं तत्सूक्ष्मरूपेणावस्थानमकार्य
त्वं च मधुविद्यायां प्रतीयते१ ।एवं प्रकृतेरजात्वेश्वरकारणत्वयोरविरोध एव। तस्मादजानतं~ ४
त्वसिद्धा॥१०॥ पुनरत्र तत्त्वसिद्धानि पंचविंशतिसंख्यानि निरूप्यंत इत्याशंक्य तत्परिहर्तुमधि
करणांतरमारभ्यते॥ ॥न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ११॥ ॥श्रूयते॰
स्याविषयः॥२ पंच पंचजनाय॥स्मिन्नाकाशश्च प्रतिष्ठितः। तमेव मन्ये आत्मानं विद्वान् ब्रह्मा

१ तथा परमेश्वरस्य पदक्रम्य इति पा०॥२॥ प्राणपंचक~ इति पा०। ३ यादोनिर्निबंधनः इति पा०।४ अजात्व
मेति इति पा०।

मह्तोऽव्यक्तं ॥ इत्यादिः । अत्र पंच पंचजना इति पदार्थाः किं सांख्यसिद्धानि तत्वानि श्रुतिप्रसिद्धानि
वेति संशयः । एवं सति पंचविंशतिसंख्यायाः सांख्यशास्त्रप्रसिद्धत्वादत्र तदवभासात् सर्वेषां
पंचपंचजना इति तान्येव प्रतिपाद्यानीति प्राप्ते ब्रूमः । इह पंच पंच । इति पंचविंशतिसंख्योपसंग्र
हादपि न तानि त्रिकाणि तत्वानि । यस्मिन् ॥ इति पदच्छेदे निर्दिष्टपरमेश्वराधारत्वममीषां प्रती
यते । तेष्वपरषांप्रयमभावात् आकाशस्य पृथङ्निर्देशेन तत्वातिरेकाच्च । तत्वातिरेकस्तत्वाना
मधिकसंख्यानं । अतोऽत्र न पंचविंशतितत्वप्रसंगः । किंच पंचविंशतिसंख्योपसंग्रहोऽपि न यु
क्तः । दिक्संख्ये संज्ञायां ॥ इति संज्ञाविषयोऽयं समासः । तस्मात् पंचजना नाम केचित् ते
हि पंच पंचजना इत्युच्यंते । सप्तसप्तर्षय इतिवत् । अतो न सांख्यतत्वप्रसक्तिः ॥११॥ के पुनरेत इ
त्यत आह ॥ ॥ प्राणादयो वाक्यशेषात् १२ ॥ ॥ प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस

श्रीकंठीय
भाष्यशैव·
५

श्रोत्रमन्नस्यान्नंमनसोयेमनोविदुः॥इतिवाक्यशेषात्पंचजनसंज्ञकाःप्राणादयःपंचेंद्रिया
णीतिगम्यते।अतोऽपिनतांत्रिकतत्वप्रसक्तिः॥१२॥ ॥पुनरुपपत्तिरुच्यते॥ ॥ज्योतिषै
केषामसत्यन्ने१३॥ ॥एकेषांकाण्वानां॥अन्नस्यान्ने॥इतिशब्दाभावे॥तद्देवाज्योतिषां॥
ज्योतिः॥इत्युपक्रमगतेनज्योतिःशब्देनपंचजनाइन्द्रियाणीतिज्ञायते।ज्योतिषांज्योतिःप्रका
शकानामपिप्रकाशकंब्रह्मेत्यर्थः॥ततःपंचपंचजनाइत्युक्तेहितानिप्रकाशकानिपंचेंद्रिया
णीतिगम्यते॥१३॥ ॥कारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेः१४॥ ॥यथाकाशा
दिषुकार्यवर्गेषुकारणत्वेनसर्वत्रवेदांतवाक्येषु॥असद्वाइदमग्रआसीत्॥तद्धेदंतर्ह्यव्याकृ ५
तमासीत्॥इत्यादिष्वननुज्ञातविशेषणेषु॥आत्मावाइदमेकएवाग्रआसीत्॥इतिविशेष
वाक्यनिर्दिष्टस्यैवोक्तेर्नतांत्रिकव्याकृतग्रहणं।तथात्रविशेषवाक्यदृष्टानामिंद्रियाणामेवोक्ते

नतांत्रिकतत्वग्रहणं॥१४॥ ॥अत्रतांत्रिकतत्वग्रहणायोगः कथमित्यतआह॥ ॥समाकर्षा
त् १५॥ ॥सोऽकामयतबहुस्यां॥इतिपूर्वनिर्दिष्टस्यसर्वज्ञस्यैव॥ असद्वाइदमग्रआसीत्॥इति
समाकर्षात्पूर्वनिर्दिष्टस्याकृतस्यैव॥ सएषइहप्रविष्टआनखाग्रेभ्य॥इतिसमाकर्षाच्च
यथासएवावगम्यते।तथात्रापिसमाकर्षात् पंचजनानामिंद्रियत्वावगतेरितिनविरोधः १५
गतःसांख्यतत्वाशंकाप्रसंगः।पुनरपिजीवात्परमेश्वरस्यान्यभावमुपपादयति॥ ॥जग-
द्वाचित्वात् १६॥ ॥श्रूयतेऽस्यविषयःकौषीतकिब्राह्मणोपनिषदि "ब्रह्मतेब्रवाणि"
इत्युपक्रम्य "योवैबालाकएतेषांपुरुषाणांकर्तायस्यचैतत् कर्मसवैवेदितव्य" इत्यादिकः।इह
वेद्यत्वेनश्रुतःपरमेश्वरोजीवोवेतिसंशयः। "यएवैषआदित्येपुरुषस्तमेवाहमुपासेयएवैषचं
द्रमसिपुरुषोयएवैषविद्युति" इत्यादिपूर्ववाक्यसंदर्भप्रकृतादित्यादिसकलस्य१जीवेऽपिवि

ध्यमानत्वात्कर्मशब्दस्यापूर्ववाचित्वादपूर्वस्य तदर्थत्वान्निर्धूतनिखिलकर्मसंबंधे परमेश्वरे त
स्यायोगाज्जीवस्यैवायमिति पूर्वः पक्षः। सिद्धांतस्तु कर्मशब्दस्यैतत्कृत्स्नस्य सामानाधिकरण्येन क्रि
यत इति श्रुतत्वाच्च जगद्वाचित्वाज्जगत्कार्यत्वस्य परमेश्वरस्यैव प्रतिपाद्यः। न हि जीवे सकलजग
त्कर्तृत्वसंभवः २।१६।। ।।पुनराशंकां परिहरति।। ।।जीवमुख्यप्राणलिंगान्नेति चेत्त
द्व्याख्यातं १७।। तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा वा स्वाः श्रेष्ठिनं भुंजंत्येवमेवैष प्राज्ञ आत्मा एतैरात्म
भिर्भुंक्ते एवमेवैत आत्मान एतमात्मानं भुंजंति।। इति १ यदा सुप्तः स्वप्नं न कंचन पश्यत्यथा
ऽस्मिन् प्राण एवैकधा भवति।। इति जीवमुख्यप्राणलिंगदर्शनान्नासौ परमेश्वर इति न वा ६
च्यं।। पूर्वत्र प्रतर्दनविद्यायां व्याख्यातत्वात् इहापि पूर्वापरपर्यालोचनया ब्रह्मपरत्वे स्थिते तदनुरू
पतयान्यानि लिंगानि नेतव्यानि। पूर्वत्र हि उपक्रमे २ ब्रह्म ते ब्रवाणि।। इति ब्रह्मोपासनं मध्ये

१ संशयः। तत्कर्तृत्वरूपप्रतर्दनस्य इति विवर०।। २ संनियोजकः। पूर्वत्र प्रतर्दनविद्यायां व्याख्यातत्वात्
इहापि पूर्वापरपर्यालोचनाद्ब्रह्मपरत्वम् इति वि०।।

चुः यस्यैतत्कर्म ॥ इति सकलजगत्कर्तृत्वमुक्तं । परस्य चोपसंहारे । सर्वान्पाप्मनोऽपहत्य सर्वे-
षां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद ॥ इति ब्रह्मोपासनेनैकान्तं सर्वपाप्मापहति-
पूर्वकं स्वाराज्यफलमुक्तं । एवमस्य प्रकरणस्य ब्रह्मपरत्वनिश्चये जीवमुख्यप्राणलिङ्गानि तत्स-
त्त्वयैव नेतव्यानि ॥ १७ ॥ ॥ पक्षान्तरमुच्यते ॥ ॥ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि
चैवमेके ॥ १८ ॥ ॥ तौ ह सुप्तं पुरुषमाजग्मतुस्तं हाजातशत्रुरामन्त्रयां चक्रे बृहन्पाण्डरवासः सो-
मराजन्न् ॥ इति ॥ स इह तूष्णीमेव शिश्ये तत उ ह एनं यष्ट्याऽऽविचिक्षेप स तत एव समुत्तस्थौ ॥ इत्य-
त्र प्राणनामभिरामन्त्रणेऽप्यतदुत्थश्रवणेन न तत्परं यष्टिघातेनोत्थानेन च प्राणाद्यतिरिक्त ३
जीवसद्भावप्रतिपादनं तदतिरिक्तपरमेश्वरप्रज्ञापनार्थमिति । क्वैष एतदबालाके पुरुषोऽशयि-
ष्ट क्व वा एतदभूत्कुत एतदागात् ॥ इति प्रश्नात् । यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्रा-

श्रीकंठीय शैवभाष्यं ७

णएवैकधाभवति॥ इति॥ सतासोम्यतदासंपन्नोभवति॥ इत्यादिवाक्यानांसमानार्थानांतत्प्रति
वचनाच्चावगम्यते।एकेवाजसनेयिनोऽयमीश्वरइतिसप्तमस्मिन्बालाकिजातशत्रुसंवादे
एतत्समानार्थमधीयते।तत्रहि॥यत्रैषएतत्सुप्तोऽभूत्क्वएषविज्ञानमयःपुरुषः क्वैषतदाभू
त्कुतएतदागात्॥ इतिप्रश्नः॥ यत्रैषएतत्सुप्तोऽभूत्यएषविज्ञानमयःपुरुषः॥ तदेषांप्रा
णानांविज्ञानमादाय॥ यएषोऽन्तर्हृदयआकाशस्तस्मिंश्छेते॥ इतिप्रतिवचनं। तस्मात्परमे
श्वरएवायंसकलजगत्कर्मेवत्वेनासिद्धः॥१८॥ सर्वत्रजीवेश्वरयोरेकशब्दविषयत्वेप्रतीयमाने
तत्समानाधिकरण्यंकथमित्यतन्निरूपणायेदमधिकरणमारभ्यते।बृहदारण्यके श्रूयते॥ वाक्यान्वया
स्यविषयः॥ नवाअरेपत्युःकामायपतिःप्रियोभवत्यात्मनस्तुकामायपतिःप्रियोभवति न १९
॥ इत्यारभ्य॥ आत्मावाअरेद्रष्टव्यःश्रोतव्योमन्तव्योनिदिध्यासितव्यः॥ इत्यादिश्रूयते।इह ७

त्मनस्तु कामायेत्यादिवाक्ये भोगप्रीतिप्रयुक्ततयात्मनः संसारित्वावगमात्तत्प्रतिपद्यमानो
जीव इति पूर्वपक्षप्राप्ते सिद्धांतयामः। परमेश्वर इति। कुतः। अमृतत्वस्य तु नाशास्ति वित्तेन।
आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं। इदं सर्वं यदयमात्मा। इत्यादेः
येनेदं सर्वं विजानाति तं केन विजानीयात्। इत्यवसानस्य कृत्स्नस्य वाक्यस्य परमेश्वरेऽन्वया
द्भोगप्रीतियुक्तजीवस्यानुवादेन परमेश्वरप्रतिपादनादविरोधः॥१९॥ ॥कथमिह सर्वत्र
जीवशब्देन परमेश्वराभिधानमिति चेत्तत्रेदं मतांतरेणोपपादयति॥ ॥प्रतिज्ञासिद्धेर्लिं
गमाश्मरथ्य२०॥ ॥आत्मनि खल्वरे दृष्ट॥ इत्यादिनोक्तस्यैकविज्ञानेन सर्वविज्ञानस्य सि
द्ध्ये जीवस्यानन्यकार्यतया तदव्यतिरिक्ततां ज्ञापयितुं जीवशब्देन परमेश्वरस्याभिधानमित्या
श्मरथ्यो मन्यते॥२०॥ ॥उत्क्रमिष्यत एवंभावादित्यौडुलोमिः२१ उत्क्रमिष्यतो मुक्तस्य

श्रीकंठीय रमेश्वरस्वरूपभावादात्मशब्देनपरमेश्वराभिधानमित्यौडुलोमिर्मेने॥२१॥ ॥अवस्थितेरि
शैवभाष्यं॰ रितिकाशकृत्स्नः २२॥ ॥यआत्मनितिष्ठन्॥इत्यादिश्रुतेर्जीवात्मनिपरमेश्वरस्यात्मत्व
८ तयावस्थानाज्जीवशब्दवाच्यत्वंपरमेश्वरस्येतिकाशकृत्स्नोमेने॥इदमेवमतंसूत्रकारस्यसम्
तत्वमुपपन्नस्यतद्विरोधेनतदाभिधानादन्यस्यानभिधानाच्चनिश्चीयते॥प्रबलश्रुत्यानुगुण्यं
चात्रसंभवति॥तथाह्यथर्वशिरसिसर्वविदश्चिदनुप्रवेशात्परमेश्वरस्यसर्वेशत्वात्मत्वमि॰
निरूप्यते॥प्रथमखंडे॰ देवाहवैस्वर्गंलोकमगमंस्तेदेवारुद्रमपृच्छन्कोभवानिति॥सोब्रवी
त्॰ अहमेकःप्रथममासंवर्तामिचभविष्यामिचनान्यःकश्चिन्मत्तोव्यतिरिक्तः॥इति॥॰सो ८
ऽन्तरादन्तरंप्राविशत्॥॰दिशश्चान्तरंसम्प्राविशत्॥॰सोहं॥॰नित्यानित्योब्रह्माहं॥इत्यारभ्य॰
प्रांचोऽहंदक्षिणांचोऽहमधश्चोर्ध्वंचादिशश्चविदिशश्चाहंपुमानहंस्त्रीचाहंगायत्र्यहं

सावित्र्यहंत्रिष्टुब्जगत्यनुष्टुप्चाहंछंदो ऽहंगार्हपत्यो ऽहंदक्षिणाग्निराहवनीयो ऽहंसत्यो ऽहंगौर
हंगौर्य्यहंजेष्ठो ऽहंवरिष्ठो ऽहमापो ऽहंतेजो ऽहमृग्यजुःसामाथर्वांगिरसो ऽहंक्षरमहक्षरमहंगुह्यो
ऽहंपुष्करमहंपवित्रमहमग्रंचमध्यंचवहिश्चपरस्ताज्ज्योतिरित्यहमेव। सर्वंचमांयोवेदससर्वा
न्वेद।। इत्यंतेन। द्वितीयखंडेचसर्वानुप्रवेशादेव।। योवैरुद्रः सभगवान् यश्चब्रह्मातस्मैवैन
मोनमः।। इत्यारभ्यब्रह्माविष्णुमहेश्वरोमाविनायकादिसर्वप्रपंचशब्दवाच्यत्वंप्रतिपाद्यते। त
थासर्वश्रुतिसामरस्यविचारेसर्वेषांचिदचिद्वस्तूनामंतर्यामितयानुप्रविष्टः सर्वशरीरः सर्वश
ब्दवाच्यः परमेश्वरः शिवइतिविज्ञायते। अतः काशकृत्स्नमतमेवश्रुतिसत्रमहाभियुक्तसम
तमितिसमंजसं।। २२।। ।।पूर्वेजन्माद्यस्ययतः।। इतिद्वितीयाधिकरणे-यतोवाइमानिभूता
नि।। इतिपंचमोश्रवणात्परमेश्वरस्यजगदुपादानत्वंसामान्येननिरूपितं।। तद्विशेषतः समर्थ

श्रीकंठीय. यितुमिदमधिकरणमारभ्यते॥ ॥प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात् २३ ॥ तस्माद्वा एतस्मा
शैवभाष्य: दात्मन आकाशः संभूतः॥ ॥ द्यावाभूमी जनयन्देव एकः॥ इत्यादिवाक्यान्यस्य विषयः। एते
९ ष्वप्रसिद्धमुभयकारणत्वं ब्रह्मणो युक्तं न वेति संदेहः संदेहश्च निमित्तस्य कुलालादेरुपादानस्य मृत्पिं
डादिभावादर्शनात्। उपादानस्य मृत्पिंडादेर्निमित्तकुलालादिभावादर्शनात्। कथमेतस्मिन्निमि
त्तत्वमुपादानत्वं च जगत्कार्ये प्रतीतिपूर्वपक्षे तु जगत्स्रष्टो निमित्तमेव। नोपादानमिति। कुतः।
असंभवात्। नहि घटं निर्मिमाणः कुलालः स्वयमेव मृत्पिंडीभूय घटं करोति। पटं वा कुविंदः। प
दिकर्तुमीहते। तत्र संभवत्येव। अतो निमित्तभूतस्य ब्रह्मण उपादानत्वं न संभाव्यते। निष्प्रयो ९
जनं च निमित्तस्यैवोपादानत्वकल्पनं। विनापि तत्कल्पनं कार्यनिष्पत्तेः। कुलालस्य मृत्पिंडादन्य
तोऽपि घटनिष्पत्तिदर्शनात्। अतो ब्रह्म निमित्तमेव। न तूपादानमपीति॥ ॥ अत्रोच्यते॥ ॥

जगतोनिमित्तमुपादानंचब्रह्मैव॥ सयोऽस्युत तमादेशमप्राक्ष्यः येनाश्रुतंश्रुतंभवत्यमतंम
तमविज्ञातंविज्ञातं॥ इतिश्रुत्यायेनादेष्ट्रानिमित्तभूतेनविज्ञातेनचिदचिद्रूपंसर्वंजगद्विज्ञातंभ
वतीत्यादेशविज्ञानेनसर्वविज्ञानात॥ यथैकेनमृत्पिंडेनविज्ञातेनसर्वमिदंमृन्मयंविज्ञातंस्या
त॥इतितदुपपादकमृत्पिंडदृष्टांतानुपरोधाच्च॥ ब्रह्मणोनिमित्तमात्रत्वेनहिज्ञानेनसकलप्रपं
चविज्ञानंनसंभवति॥ तथाहि॥ कुलालज्ञानेनकार्यंनज्ञायते॥ किंतुतदुपादानमृत्पिंडज्ञानेन॥
अतोनिमित्तस्यब्रह्मणउपादानत्वंतत्संभवतीति ब्रह्मैवोपादानमप्यादिश्यते॥२३॥ ॥अ
नेनेत्यादेशशब्दादेष्टृभूतंब्रह्मोच्यते॥ न१ तदर्थांतरत्वमुपादानस्येतिज्ञापयितुंहेत्वंतरमाह॥ ॥
अभिध्योपदेशाच्च२४॥ ॥तदैक्षतबहुस्यांप्रजायेय॥इतिनिमित्तभूतस्यैक्षितुःसर्वज्ञस्यब्रह्म
णएवविचित्रजगदाकारेणबहुभवनसंकल्पउपदिश्यते। अतोनिमित्तादनन्यदुपादानं॥२४॥

श्रीकंठीय शैवभाष्यं १०

ननु॥ विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं पश्यति जायमानं॥ इति विश्वोत्तीर्णोऽयं सर्वज्ञः परमे
श्वरो निमित्तः स्वमतिरिक्तप्रकृतौ स्वसंकल्पेन जायमानं सकलदेवप्रथमं हिरण्यगर्भं सृष्टमत्र
यह दृष्ट्वा पश्यतीति विज्ञायते। कथमस्य विश्वाकारत्वं प्रकृतिरूपत्वेन संभवति॥ मायां तु प्रकृ
तिं विद्यात्॥ इति मायायाः प्रकृतित्वं श्रूयते। तस्माद्विराडजायत विराजो अधिपुरुषः॥ इति प

१ येनाश्रुतं भवति। येनादेश्यानिमित्तभूतेन श्रुतेनाश्रुतमपि श्रुतं भवतीति ब्रह्मैवोपादानम
प्यादिश्यते। अनेनेत्यादेशशब्दादादेष्टृभूतं ब्रह्मोच्यते। तज्ज्ञानेन कार्यस्य ज्ञानत्वप्रतिज्ञोपाद १०
नत्वसाधिका। यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं भवति॥ इत्यादिदृष्टांतश्चातदुभ
यात्रराधान्निमित्तमुपादानं च ब्रह्म॥ २३॥ इतश्चेनदुत्पत्तं या०॥

रूपस्य प्रकृतित्वमाम्नायते। अतस्तयोरेव प्रकृतित्वेन जगदाकारत्वमुचितमित्यत आह॥ ॥
साक्षाच्चोभयाम्नानात्॥ २५॥ ॥साक्षात्प्रत्यक्षमेव वेदांतभागेषु परमेश्वरस्य प्रकृतित्वेन
जगदाकारत्वं निमित्तत्वेन जगदुत्पादकत्वं२ च श्रूयते। तथाहि॥ विश्वाधिको रुद्र॥ इत्यादि-
ना यथा विश्वाधिकत्वमवगम्यते॥ तथा॥ सर्वो वै रुद्र॥ इत्यादिना प्रकृतित्वाद्विश्वरूपत्वमपि
श्रूयते। शतरुद्रीये॥ नमो हिरण्यबाहवे॥ इत्यारभ्य॥ कुलुंचानां पतये॥ इत्यंतेन विश्वाधिप
त्यं। तत्रैव॥ नमः पर्णाय च पर्णशदाय च॥ इत्येतत्पर्यंतेन जगदाकारत्वं च परमेश्वरस्य श्रू
यते। प्रदेशांतरे च॥ ब्रह्म सदस्यासीद्ब्रह्माध्यतिष्ठद्भुवनानि धारयन्॥ इत्युभयश्रुतिः॥ अ
थर्वशिरसि च प्रथमद्वितीयखंडयोर्जगदाकारत्वं॥ तदुपरि जगदीश्वरत्वं च। ततः प्रत्यक्षमुभया
म्नानाज्जगज्जगदीश्वरस्य प्रकृतिनिमित्तत्वेन परब्रह्म परमेश्वरः शिव इति युक्तमेव॥ २५॥ ॥

१ रेव जगदाकारेण प्रकृतित्व इति पा०॥ २ जगत्पतित्वं इति पा०॥

श्रीकंठीय ॥ ॥आत्मकृतेः २६॥ ॥तदात्मानंस्वयमकुरुत॥ इतिस्वस्यैवजगदाकारत्वेनकृतित्वगम्य
शैवभाष्यं तेपरमेश्वरस्यअतःसर्वोपादानंनिमित्तंच॥ २६॥ ॥ननुज्ञानविकारास्पदमायायाःप्रपंच
११ रूपेणप्रकृतिभावेनकथंवर्त्तनंनिरस्तसमस्तदोषलवकलंकानिःसीममंगलगुणरत्नाकरो
निरंकुशनित्यसिद्धवैभवःप्रपंचातीतःपरमशिवइत्यतआह॥ ॥परिणामात् २७॥ ॥नि
त्यशुद्धानंदस्यनिरतिशयमंगलस्वभावस्यापिनिमित्तस्यप्रकृतित्वेनजगदाकारत्वमुक्तमेव।
परमशिवस्यचिदचिदाकारेणपरिणामात्।हेतुकारणविकाररूपोहिपरिणामः।पूर्वरूपपरि
त्यागेनरूपांतरापत्तिःपरिणामइति।कथंपरमेश्वरोऽनर्थधर्मान्परिगृह्णतइतिचेत्।सत्यं। ११
यथानिमित्तस्यप्रकृतित्वेऽपिनविकारादिस्पर्शः।तथापरिणामःसंभवति।कोऽयमपूर्वःप
रिणामः।कुतस्त्यः।कुतूहलिनोवयंतच्छ्रवणे।विविच्यतामितिचेत्।शृणुविवेचयामः॥

यदातमस्तन्नदिवानरात्रिर्नसन्नचासंछिवएवकेवलः।तदक्षरंतत्सवितुर्वरेण्यंप्रज्ञाचत
स्मात्प्रसृतापुराणी॥ ॥इति।यस्मिन्कालेविगतचंद्रसूर्यादितेजस्तयादिवारात्रिविभा
गशून्यंनामरूपविशेषराहित्येनस्थूलसूक्ष्मचेतनाचेतनसदसद्भ्रान्त्यवस्थारहितंसर्वमि
रंतमोभूतमवर्त्तत।तदाशिवएवाद्वितीयःकेवलःस्वाविभागापन्नचिदचिच्छक्तिःस्वप्रका
शःपरिशिष्टोऽभूत्।तदक्षरंतदेवतदानीमक्षररहितंनाशरहितंपरंवस्तु।तत्सवितुर्वरेण्यंतत्
सवितुरादित्यस्यपूर्वंतेजःश्रेष्ठत्वेनवरेण्यमंतर्वर्तितेजस्तद्रूपितदेव।तस्मात्तादृशात्स्वविली
नस्वेतरनिखिलचिदचित्प्रपंचात्रहितापापुराणीनित्यसिद्धा।तत्कालतमोऽपनोदिनीमहा-
स्फुरणरूपापरमापज्ञाज्ञानशक्तिःप्रसृताप्रावर्त्तत।ततः“सोऽकामयतबहुस्यां”इतिनाम
रूपादिविभागरहितसूक्ष्मचिदचिद्वस्तुशरीरकःकारणावस्थःपरमेश्वरःसविभक्तनामरूपवि

श्रीकंठीय शैवभाष्यं॰ १२

दचिद्वस्तुशरीरकोऽ२ भेवयामिति संकल्पमकरोत्। ततश्च ॰ इदं सर्वमसृजत॥ यदिदं किंच न इति। स्व
शरीरभूतं सूक्ष्मचिदचिद्वस्तु स्वस्माद्विभज्य ॰ तत्सृष्ट्वा तदेवानुप्राविशत्। इति। स्वतो विभक्ते
चिदचिद्वस्तुनि स्वयमात्मतयानुप्रविश्य ॰॰ सच्च त्यच्चाभवत्॥ इत्यादिना सदसत्प्रपंचरूपेण बहु
धापरिणतोऽभवदिति पुरुषस्य बालतत्त्वपुत्रत्वादिवद् ब्रह्मणो जगच्छरीरिणः कारणत्वकार्य
त्वं च॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं। तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥ ॥
इति श्रवणान्मायायाः सकलप्रकृतित्वेन तद्विशिष्टत्वे महेश्वरस्य तदवयवभूतेनांशभूतेन चि-
च्छक्तिशकलभूतेन भोक्तृत्वदशायां पुरुषसंज्ञकेन सकलजगद्व्याप्तिश्चावगम्यते। यथा केव १२
लभूतेन भोक्तृत्वदशायां पुरुषसंज्ञकेन सकलजगज्जालाच्छरीरात्स्वात्मनस्त्वाद्युत्पत्तिर्न संभवति
आत्मनश्च तथा ना केवलं तु मायाया जगदुत्पत्तिर्महेश्वराच्च। किं तु मर्त्यशरीरिणः केशनखा

१ सनातनीति इति पा॰॥ २ परमेश्वरो व्यक्तिचिच्छक्तिपतिर्विंबो व्यक्तनामरूपचिदचिद्वस्तुशरीरको
इति पा॰॥

घुतमतिचन्मापिनः परमेश्वरात्सकलचेतनाचेतनप्रकृतिपुरुषाभिव्यक्तिर्भवति। तद्रूपादीश्वराद
व्यक्तचतुर्मुखाद्युत्पत्तिः। तथा च श्रुतिरीश्वरस्य पुरुषरूपत्वमभिधत्ते॥ पुरुषो वै रुद्र॥ इति। ततः
समुचितं विद्वद्विशिष्टः परमेश्वरः कारणं कार्यं च। तदवस्थाविशेषादिति॥ २७॥ ॥योनि
श्चाहि गीयते २८॥ ॥साक्षात्परमेश्वरस्यैव भूतयोनिरित्युच्यते। उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकंठं प्रशांतं। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्॥
इति समस्तसाक्षिणः सर्वज्ञस्य तमसः परस्य विश्वोनोर्णस्य परमशान्तोमयासहितस्य विशिष्ट
स्य परमेश्वरस्यैव भूतयोनित्वं भूतभौतिकप्रकृतित्वं गीयते। ततश्चोपादानमपि निमित्तं परब्रह्मै
व॥ २८॥ ॥एतेन सर्वे व्याख्याता व्याख्याताः २९॥ ॥जन्माद्यस्य यत॥ इत्यादिनैतदंतेन
वेदांतवाक्यानां व्याख्यानेन ब्रह्मलिंगाभिधायिनो वेदांतरूपाः कर्मकांडमध्यपातिनः पुरुषसू

श्रीकंठीय
शैवभाष्यं
३३

क्तशतरुद्रियप्रभृतयो मंत्रब्राह्मणभागाः। स्मृतीतिहासपुराणाभियुक्तसूक्तिविशेषाश्च। व्या
ख्याताः इति। द्विरुक्तिरध्यायसमाप्त्यर्था। अत्र कर्मप्रकरणपठितानां पुरुषसूक्तशतरुद्रियादी
नां स्मृतीतिहासपुराणादीनां च तात्पर्यलिंगसमन्वयेन ब्रह्मबोधकत्वमस्ति न वेति संशयः। सं
शयबीजं प्रकरणभेदादिकं। कर्मप्रकरणगतानां पुरुषसूक्तादीनामनुष्ठानजीवपरत्वमेव समी
चीनं। न नित्यमुक्तब्रह्मविषयत्वं· प्रयोजनाभावात्। स्मृतिपुराणादीनामपि नैकात्म्यः परत्वमस्ति
। यतस्तेषु कतिचिद्ब्रह्माणं परं ब्रह्मेत्याहुः। कतिचिद्विष्णुं। कतिचिद्रुद्रं कतिचिच्छक्तिमेव। क-
तिचिदग्निं कतिचित्सूर्यं। कतिचिद्वायुं। कतिचिदन्यं। एवमनवस्था भवतीति। अत एतेषां न ३३
ब्रह्मबोधकत्वमिति न युक्तमिति। प्राप्ते ब्रूमः। पुरुषसूक्तादीनां ब्रह्मबोधकत्वमस्ति। तल्लिंगदर्शि
नात्। तस्माद्विराडजायत। आदित्यवर्णं तमसस्तु पारे। तमेवं विद्वानमृत इह भवति॥ इति स

कलकारणत्वं। नमः परत्वामृतहेतुत्वादीनां परमेश्वरलिंगानामत्र संबंधो दृश्यते। अत ईश्वर एवा
त्र पुरुषशब्देन प्रतिपाद्यते। शतरुद्रीये च साक्षात्परमेश्वरस्य जगदाधिपत्यं जगदात्मकत्वं नील
ग्रीवत्वादिलक्षणं च श्रूयते।३ अतः परमेश्वरस्य तद्बोध्यत्वं युक्तं॥ ॥ननु परमेश्वरस्य मंगलरू
पैकनिधानस्य शतरुद्रीयप्रतिपाद्यत्वमयुक्तमिव प्रतिभाति। प्रथममेवात्र "नमस्ते रुद्र मन्य
व" इति हेयगुणमन्युसंबंधावगमात् इति चेत्। नैवं विचारणीयं। मन्युशब्दस्यात्र ज्ञानवाचक
त्वात्। अथवा क्रोधपर्यायत्वेऽपि मन्युशब्दस्य न दोषः। दुष्टनिग्रहार्थं स्वेच्छागृहीतप्रकृतिगुण
त्वेनास्य परमेश्वरे संबंधाभावात्। पुराणादीनां च तात्पर्यलिंगवशेन ब्रह्मविष्ण्वादिनतच्छ्रत्वा
त्वं सर्वात्मकं सर्वज्ञं सर्वशक्ति सर्वाधिकमसामान्यवैभवं ब्रह्मशब्दार्थविश्रांतिपदं निखिल
वेदांतवाक्यसामंजस्यसमन्वयात् नान्यथावसानविषयं शिवमुमासहितं परमेश्वरं प्रतिबोधक

१ सनातनी इति पा०॥२ परमेश्वरो व्यक्तिचिच्छक्तिप्रतिबिंबो व्यक्तनामरूपचिदचिद्वस्तुशरीरकोऽ
तिया०॥१ -र्थं- इति पा०॥२ त्वमिति विवरणा०॥३ निदानस्य इति पा०॥४ -शब्द- इति पा०॥

श्रीकंठीय त्वंयुक्तमेव। यदुक्तंकर्मप्रकरणमितितत्रलिंगेनप्रकरणबाधोयुक्तः। अनेनैवन्यायेनयत्रय

शैवभाष्य. अचेतनेऽचेतनेवाजगत्कारणत्वादिकंश्रूयतेवेदादिषुप्रमाणवचनेषु॰ तत्रतत्रतदात्माशि

१४ - वएववाच्यः। यत्रयत्रापुरुषार्थविकारान्तत्वादिकोधर्मस्तत्रतत्राशिवस्यपरब्रह्मणःशरीरं

चिदचिद्वस्त्ववबोध्यतद्द्वारेणतन्निरूप्यमिति॰ सर्वंसमंजसमेव॥२९॥ ॥इतिश्रीकं

ठशिवाचार्यविरचितेब्रह्ममीमांसाभाष्येप्रथमस्याध्यायस्यचतुर्थःपादः॥४॥ ॥समाप्त

श्चप्रथमोऽध्यायः॥ॐ तत्सत्॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥सदाशिवेंद्रभि १४


क्षुणाव्यलेखिकाशिकापुरेसदाशिवस्तुष्टयेतन्मोघशैवभाष्यकं॥ ॥सदास्तुसाधुर्गीसि

तुमतांशिवस्यशासनान्मुदावलोकयंतियल्लभंतितत्परंपदं॥१॥ ॥संवत्१९४६मासेअ

श्रीकंठीय श्विनमासेशुक्लपक्षेऽष्टम्यांबुधवासरे ॥ ः ः ः ः ः

शैवभाष्यं·

१५



इतिव्याससूत्रीयब्रह्ममीमांसाशैवभाष्यस्य
प्रथमाध्यायस्यचतुर्थपादःसमाप्तः॥ ॥